केशी *m.* (न्), केशः, केशटः.—(Bearer of the flute) वंशीधरः, मुरलीधरः.—(Lord of the shepherdesses) गोपीनाथः.—(Beloved of Rádhá) राधाकान्तः, राधावल्लभः, राधानाथः.—(Destroyer of Arishta) अरिष्टसूदनः.—(Of Keśin) केशिहा *m.* (न्), केशिसूदनः. —(Of Kálanemi) कालनेमिहा *m.*, कालनेमिरिपुः *m.*, कालनेमिशत्रुः *m.*, कालनेम्यरिः *m.*—(Dressed in yellow clothes) पीताम्बरः. —(Conqueror of Chánúrá) चानूरजित्.—(Killer of Kansa) कंसहा *m.*, कंसजित् *m.*, कंसारिः *m.*, कंसारातिः *m.*—(Lord of Mathurá) मथुरेशः.—(Bearer of the couch Pánchajanya) पाञ्चजन्यधरः.—(Conqueror of Kálayavana) कालयवनजित्.—(Lord of Dwáraka) द्वारकेशः, द्वारकनाथः.—(Husband of Jámbavatí) जाम्बवतीपतिः *m.*—(Conqueror of Naraka) नरकजित्, नरकान्तकः.—(Destroyer of Mura) मुरहा *m.*, मुरारिः *m.*, मुररिपुः *m.*—(Conqueror of Paundraka) पौण्ड्रकजित्.—(Bearing the discus) चक्रधरः, चक्री *m.* (न्), चक्रपाणिः *m.*, चक्रहस्तः, चक्रवान् *m.* (त्), चक्रभृत् *m.*—(Bearing the conch) शङ्खी *m.* (न्), शङ्खभृत् *m.*—(Blowing the conch) धमः.—(Bearing a chaplet or garland) वनमाली *m.* (न्), मालः.—(Bearing the jewel on his breast) कौस्तुभवक्षाः *m.*, कौस्तुभलक्षकः.—(Destroyer of the demon Madhu) माधवः, मधुजित्, मधुरिपुः *m.*, मधुभिद् *m.*, मधुमथनः. —(Having Garuda as his symbol) गरुडध्वजः, तार्क्ष्यध्वजः, तार्क्ष्यनायकः.—(Foe of barbarians) यवनारिः.—(Foe of the daityas) दैत्यारिः *m.*—(The undecaying one) अच्युतः, अनन्तः. —(Worshipped by men) जनार्दनः.—(Lord of the senses) हृषीकेशः. The following are other names of this deity, some of which will be explained under the head of Vishnu हरिः *m.*, नारायणः, वैकुण्ठः, स्वभूः *m.*, पुण्डरीकाक्षः, विष्टरश्रवाः *m.* (स्), शार्ङ्गी *m.* (न्), पद्मनाभः, वासुभद्रः, वासुः *m.*, त्रिविक्रमः, विष्वक्सेनः, चतुर्भुज्, शौरिः *m.*, पुरुषोत्तमः, बलिध्वंसी *m.* (न्), विश्वम्भरः, विधुः *m.*, अधोक्षजः, कैटभजित् *m.*, राहुभेदी *m.* (न्), कुस्तुभः, उरुगायः. Krishna's mace or club is called कौमोदकी; 'his sword,' नन्दकः; 'his jewel,' कौस्तुभः, स्यमन्तकः; 'his discus,' सुदर्शनः, चक्रं; 'his conch,' पाञ्चजन्यः, शङ्खः; 'his garland,' वनमाला; 'his charioteer,' सात्यकिः *m.*, शैनेयः, दारुकः, युयुधानः; 'his heaven,' गोलोकः; 'a festival in his honour,' रासयात्रा: 'his paternal uncle and friend,' अक्रूरः; 'his grandfather,' शूरः; देवकः; 'his city,' द्वारकः -का, द्वारिका, द्वारवती, अब्धिनगरी. A modern reformer of the Vaishnava faith called चैतन्यः is considered in Bengal as an avatár of Vishnu. He is also called गौरचन्द्रः, गौराङ्गः

KRORE, *s.* (Ten millions) कोटिः -टी.

KURÁN, *s.* यावनधर्म्मग्रन्थः, यावनधर्म्मपुस्तकं, यवनीयधर्म्मशास्त्रं.

KUVERA. *s.* (God of wealth, the Hindu Plutus, chief of the Yakshas and Guhyakas, into whose forms transmigrate the souls of those men who in this life are absorbed in the pursuit of riches. He is the son of Viśravas by Ilavilá and regent of the north. He is represented in external appearance as a mere man, but with a deformed body, having three legs and but eight teeth. Hence he is called) कुवेरः, मनुष्यधर्म्मा *m.* (न्), कुहः.—(As lord of wealth) धनपतिः *m.*, धनाधिपः, धनदः, धनकेलिः *m.*, धनाध्यक्षः, वित्तेशः, वसुः *m.*, अर्थपतिः *m.*, श्रीमान् *m.* (त्), श्रीदः.—(Chief of the Yakshas) यक्षराजः, यक्षराट् *m.* (ज्), यक्षेन्द्रः, यक्षेशः, पुण्यजनेश्वरः, राक्षसेन्द्रः, यक्षः.—(Son of Viśravas) वैश्रवणः.—(Son of Ilavilá) एलविलः, ऐलविलः, ऐडविलः, ऐडविडः.—(Regent of the north) उत्तराशापतिः *m.*—(Lord of the Kinnaras) किन्नरेशः, किन्नरेश्वरः, किम्पुरुषेश्वरः, मयुराजः.—(Descended from Pulasti or Pulastya) पौलस्त्यः.—(King of kings) राजराजः.—(King of men) मनुराट्.—(Borne by men) नरवाहनः.—(Friend of Siva) त्र्यम्बकसखः, ईशसखः -खा.—(Having a yellow mark in place of one of his eyes) एकपिङ्गः -ङ्गलः.—(Lord of Alaká) अलकाधिपः -पतिः *m.*—(Inhabiting Kailása) कैलासनिकेतनः, कैलासौकाः.—(Lord of the divine treasures) निधिनाथः, निधीशः. —(The very fleet) रयिष्ठः. Kuvera's vehicle or car is called पुष्पं -ष्पकं; 'his garden,' चैत्ररथं; 'his city,' अलका, वसुधारा, वसुभारा, वसुस्थली, यक्षराट्पुरी.—(The mountain on which his city is situated) कैलासः, कुवेराचलः, कुवेराद्रिः *m.* —(His wife) कौवेरी, चार्व्वी, यक्षी, चामुण्डा.—(His son) नलकूबरः, नलकूवरः, नलकूवेरः, मणिग्रीवः, मायुराजः.—(His attendants, who are shaped like men with the heads of horses) किन्नरः, किम्पुरुषः, तुरङ्गवदनः, तुरङ्गवक्त्रः, तुरङ्गाननः, तुरङ्गास्यः, अश्ववक्त्रः, अश्ववदनः, मयुः.—(His divine treasure) निधिः *m.*, निधानं, शेवधिः *m.*, सेवधिः. There are nine of these treasures or gems, viz. पद्मः, महापद्मः, शङ्खः, मकरः, कच्छपः, मुकुन्दः, नन्दः, नीलः, खर्व्वः.—(Relating to Kuvera) कौवेरः -री -रं.

## L.

LABEL, *s.* पत्रं, सूचकपत्रं, अङ्कपत्रं, अङ्कपटः, बीजकं.

*To* LABEL, *v. a.* सूचकपत्रम् आरुह् (c. 10. -रोपयति -यितुं) or अनुबन्ध् (c. 9. -बध्नाति -बन्धुं) or बन्ध्.

LABIAL, *a.* ओष्ठ्यः -ष्ठ्या -ष्ठ्यं, ओष्ठसम्बन्धी -न्धिनी -न्धि (न्); 'a labial letter,' ओष्ठ्यं.

LABIODENTAL, *a.* दन्तोष्ठ्यः -ष्ठ्या -ष्ठ्यं, दन्तौष्ठ्यः &c., दन्त्योष्ठ्यः &c.

LABOR, *s.* (Exertion) उत्साहः, उद्योगः, यत्नः, प्रयत्नः, व्यवसायः, अध्यवसायः, उद्यमः, आयासः, कर्म्म *n.* (न्), क्रिया, प्रवृत्तिः *f.*, व्यापारः, चेष्टा.—(Toil) आयासः, प्रयासः, क्लेशः, श्रमः, परिश्रमः, कष्टं, दुःखं, नित्यश्रमः, नित्यक्लेशः.—(Bodily or manual labor) कायक्लेशः, देहक्लेशः, शरीरायासः, शरीरक्लेशः, शरीरश्रमः, व्रातं.—(Unpaid labor) विष्टिः, आजूः *f.*—(Travail, childbirth) प्रसववेदना, प्रसूतिवेदना, गर्भवेदना, प्रसवयातना, प्रसवकालः, प्रसूतिकालः; 'acquired by one's own labor,' स्वकष्टार्जितः -ता -तं.

*To* LABOR, *v. n.* (Exert strength, make effort) यत् (c. 1. यतते -तितुं), प्रयत्, व्यवसो (c. 4. -स्यति -सातुं), उद्यम् (c. 1. -यच्छति -यन्तुं) चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, उद्योगं कृ, उत्साहं कृ, यत्नं कृ, व्यवसायं कृ, आयासं कृ.—(Toil) आयस् (c. 4. -यस्यति -यसितुं), आयासं कृ, श्रम् (c. 4. श्राम्यति, श्रमितुं), परिश्रम्, क्लिश् (c. 4. क्लिश्यते, क्लेशितुं), परिक्लिश्, शरीरायासं कृ, व्रातं कृ, शरीरायासेन कर्म्म कृ, कष्टं कृ.—(Be in distress) क्लिश्, व्यथ् (c. 1. व्यथते -थितुं), पीड् in pass. (पीड्यते), तप् in pass. (तप्यते), कृच्छ्र (nom. कृच्छ्रायते), खिद् in pass. (खिद्यते), परिखिद्.—(Be in travail) प्राप्तप्रसववेदना भू, प्राप्तगर्भवेदना भू, प्राप्तप्रसवकाला भू.—(Labor under) उपहन् in pass. (-हन्यते), पीड् in pass. (पीड्यते), उपहतः -ता -तं भू, पीडितः -ता -तं भू; 'to labor